International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 168-170
© 2021 IJSR
www.anantaajournal.com
Received: 16-05-2021
Accepted: 18-06-2021

**अवस्थी शैलेशकुमारः**
शोधच्छात्रः, (NET, JRF)
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः आंध्र प्रदेश, भारत

Corresponding Author:
**अवस्थी शैलेशकुमारः**
शोधच्छात्रः, (NET, JRF)
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः आंध्र प्रदेश, भारत

# महामारीकाले संस्कृतसंवर्धनम्

**अवस्थी शैलेशकुमारः**

'उत्सवप्रियाः खलु मनुष्याः' इति विचारधारोपेतां परम्पराम् अनुवर्तयन्तः भारतीयाः प्रत्येकमपि पर्व महता वैभवेन पालयन्तः अकस्मात् विस्मयान्विताः अभवन्। यत्र कारणं समुपस्थितेऽयं महामारी ! यस्याः प्रकोपकारणतः सम्पूर्णविश्वं स्थगितम्। समग्रे देशे सञ्चारनिरोधः । गृहात् बहिः गन्तुं न शक्यते। अन्यस्य गृहं गन्तुं न शक्यम् । कक्ष्याः आयोजयितुं न शक्याः । वर्गान् व्यवस्थापयितुं न शक्यम् ... इत्येवं सर्वतः अपि दिग्बन्धनम्। वेगेन गच्छन्त्याः नद्याः प्रवाहस्य हठात् अवरोधः जातः इव । तूष्णीं स्थातुं न शक्यते । कार्ये प्रवृत्तिं दर्शयितुं नास्ति कोऽपि मार्गः । हठात् उत्पन्नायाः अस्याः स्थितेः कारणतः जनेषु सकृत् दिग्भ्रान्तिः दृष्टा । किन्तु पूर्णसरसः मुख्यः प्रवाहनिर्गममार्गः अवरुद्धः भवेत् चेदपि जलनिर्गमनं तु मार्गान्तरेण सम्भवेत् एव ननु ? संस्कृतक्षेत्रेऽपि एवमेव जातम् तस्य परिणामतः सर्वत्र अपि कार्यक्रमाः तु प्रवृत्ताः एव। द्विगुणिततया त्रिगुणिततया वा कार्यक्रमाः प्रवृत्ताः, प्रवर्तमानाः च सन्ति ।पत्रेऽस्मिन् तादृशाः केचन कार्यक्रमाः संस्तुताः येषां कारणतः संस्कृतसंवर्धने इतोऽपि श्लाघनीयविकासोऽभूत्।

- प्रधानसंसूचकानि - आनलाइन् कक्ष्याः, ई-सङ्गोष्ठ्यः, कार्यशालाः, स्पर्धाः, प्रशिक्षणम् इत्यादयः।

- उपोद्घातः

वस्तुतः अस्यां स्थितौ सामान्यतया जनाः भीताः आसन्, तथापि संस्कृतं पठितुं या प्रीतिः यश्च ममकारः दृष्टः सः अद्भुतः अविस्मरणीयश्च आसीत्। कदाचित् एतस्मात् इत्थं वक्तुं शक्यते यत् संस्कृतं प्रति जनेषु आसक्तिः अनुरागश्च पूर्वमेव विद्येते परं समयाभावात् दैनन्दिनकार्यक्रमव्यस्तताकारणादेव पठितुं अशक्ताः आसन् इति। आबालवृद्धाः एतस्मिन् कालावधौ स्वेच्छां स्वप्नं वा पूरियितुम् अवकाशं प्राप्तवन्त इति नात्र संशयलेशः। समग्रदेशे प्रवृत्ताः कार्यक्रमाः – सम्भाषणशिबिरं, भाषाबोधनवर्गः, गीतगानस्पर्धाः, सामान्यकक्ष्याः, चर्चा-गोष्ठी, भगवद्गीतापाठनम् इत्यादयः।

**मुख्यांशाः**

IIT-Roorkee एवं संस्कृतभारत्योः संयुक्ततत्त्वावधाने आयोजितं सुभाषितं संस्कृतम् इति कार्यक्रमः उत्तमतया सञ्चालितः। तत्र आभारतात् 10000 जनाः विदेशेभ्य अपि बहवः भागं गृहीतवन्तः। कार्यक्रमेऽस्मिन् बहवः ज्येष्ठाः स्वीयवक्तव्यं प्रस्तुतवन्तः।उत्तरप्रदेशस्य सर्वकारेण ऐतिहासिकः निर्णयः स्वीकृतः यत् कोरोनासम्बद्धाधिकारिक पत्राणि संस्कृतेऽपि प्रचुरितानि भवन्ति इति। देशस्य कोणे कोणे संस्कृतस्य सम्यक् प्रचारः जातः अस्मिन् काले। अस्य महामारीकालस्य धनात्मकपक्षः अयमेव भवति यत् स्वीयपरिवारेण सह सर्वे मिलित्वा आनन्दमनुभूतवन्तः संस्कृतमधीतवन्तश्च। संस्कृतेनैव गीतायाः पठनं ज्ञानप्रदं आनन्दप्रदं च इति विचिन्त्य अक्षरे आनलाईन् माध्यमेन गीताशिक्षणकेन्द्रस्य उद्घाटनमभवत्। एतस्यां महामारीस्थितौ भगवद्गीता एव अस्मान् धैर्यशालिनः कर्तुं पारयतीति न हि अतिशयोक्तिरत्र। संस्कृतभारत्याः उत्तरामेरिकायाः कार्यकर्तृभिः जालपुटद्वारा 'प्रतिदिनं संस्कृतम् – कथामाला' इति 21 सप्ताहात्मकं अभियानमारब्धमासीत्।

**ई-गोष्ठी -**

सम्पूर्णवर्षमिदं भिन्नगोष्ठिभिः व्यापृतः विद्यते। सामान्यतया संस्कृतक्षेत्रे प्रविधेः प्रयोगः निराकृतमिव दृश्यते स्म पूर्वं, तदेव अधुना तद्विना कार्यं न चलतीति विज्ञाय संस्कृतज्ञाः सर्वेऽपि सङ्गणकस्य प्रयोगम् आरब्धवन्तः। सर्वैः पन्थाह्वानमिदं स्वीकृतं साधितञ्च। न हि कोऽपि सर्वं जानाति चेदपि ई-गोष्ठीनां सञ्चालनं बहु उत्तमतया सम्पादितमिति वक्तुं शक्यते।

गोष्ठीषु प्रायः सर्वविधविषयाः आसन् यथा -

- संस्कृतविकाससम्बद्धगोष्ठी
- शास्त्रसम्बद्धगोष्ठी
- प्रशिक्षणसम्बद्धगोष्ठी
- सम्मेलनानां गोष्ठी
- चर्चा गोष्ठी
- वादविवाद गोष्ठी

**सामान्य गोष्ठी**

एवं बहुप्रकारकगोष्ठ्यः सर्वत्र आभारतम् अस्मिन् महामारीकाले सद्यस्कमाध्यमेनैव सञ्चालिताः ।

**राष्ट्रियशिक्षानीतिः-2020**

भारतं ज्ञानक्षेत्रे कौशलक्षेत्रे,प्रौद्योगिकक्षेत्रे विज्ञानक्षेत्रे आर्थिकक्षेत्रे च विश्वे अग्रेसरं भवेत् इति राष्ट्रस्य आकाङ्क्षाः शिक्षानीतौ दर्शिताः। तदनुगुणं शिक्षाव्यवस्था कल्पनीया इति अपेक्षा। अतः संस्कृतशिक्षा अपि तदनुसारिणी भवेत्। समृद्धस्य आत्मनिर्भरस्य जगद्गुरोः भारतस्य निर्माणाय यादृशानां जनानाम् आवश्यकता अस्ति तादृशस्य जनबलस्य निर्माणाय खलु एषा शिक्षाव्यवस्था अस्ति। किञ्च अधीतसंस्कृतः कश्चन न केवलं शिक्षाक्षेत्रे, अपि तु वाणिज्यक्षेत्रे, व्यावसायिकक्षेत्रे, प्रशासनक्षेत्रे, उद्योगक्षेत्रे, आर्थिकक्षेत्रे, विधिक्षेत्रे, प्रौद्योगिकक्षेत्रे इत्येवं सर्वेषु क्षेत्रेषु आजीविकां यथा प्राप्तुं शक्नुयात् तथा तस्य शिक्षणं भवेत् इति अस्माभिः द्रष्टव्यम्। तादृशाः पाठ्यक्रमाः निर्मातव्याः। तदा एव संस्कृतपठनाय छात्राः आगच्छेयुः, अन्यथा नैव आगच्छेयुः। तस्मात् संस्कृतशिक्षायाः पुनारचना अनिवार्या एव ।

किञ्च अस्माभिः एतदपि चिन्तनीयं यत् यदा जगति सर्वे बालाः सङ्गणकं जानन्ति, व्यावहारिककौशलानि प्राप्नुवन्ति तदा यदि अस्माकं संस्कृतच्छात्रः तेषु विषयेषु अनभिज्ञः तिष्ठेत् तर्हि सः अस्यां जगति इतरैः सह कथं साभिमानं ससम्मानं च जीवेत् ? कथं वा आजीविकां प्राप्नुयात् ? संस्कृतस्य भविष्यभूताः ये अस्माकं प्रियसंस्कृतच्छात्राः सन्ति तान् मनसि निधाय तेषाम् उज्ज्वलभविष्य मनसि निधाय अस्माभिः संस्कृतशिक्षायाः नवा नवशिक्षानीतौ संस्कृतस्यस्थानं कीदृशमित्यपि चिन्तनीयं संस्कृतज्ञैः। तत्र मुख्यरूपेण 40 परिवर्तनानि उक्तानि सन्ति।

**प्रधानविषयः**

संस्कृतभाषासंवर्धनम् न तु एकस्याधीनं परं संस्कृतज्ञानां सर्वेषामपि इदं प्राथमिककर्त्तव्यं भवति। संस्कृतक्षेत्रे वैज्ञानिकप्रविधिनां ज्ञानं इतोऽपि आवश्यकं। यतः कालोऽयं

नाचिरात् समाप्यतेऽति द्रष्टुं शक्यते तदर्थम् अस्माभिः नूतनोऽपायाः मार्गाः चिन्तनीयाः येन संस्कृतविकासः स्थगितं न भवेत्। भविष्यतः चिन्तनं विधाय संस्कृतज्ञैः विना संकोचं अग्रे पदं स्थापनीयं, तस्मादेव तदैव नूतनमार्गः उद्घाट्यते।

'आवश्यकता नवनिर्मितेः नूतनाविष्कारस्य च जननी' इति वचनं श्रूयते लोके । देशविषये इव संस्कृत कार्यविषये अपि एतत् अन्वेति। तन्त्रज्ञानक्षेत्रे भारतेन विशिष्टा प्रगतिः साधनीया अस्ति। एतत्सम्बद्धस्य तन्त्रज्ञानस्य न कोऽपि बोधयिता। तथापि अल्पे एव काले अस्मद्देशीयैः अपेक्षितानि साधनानि निर्मितानि एव । वस्तुतः एतत् उदाहरणमात्रम् । एतादृश्यः वह्व्यः घटनाः घटिताः देशे। पुनरपि चिन्त्यते चेत् विविधाः योजनाः कालेऽस्मिन् दृष्टिगोचराः भवेयुरिति। बालानां विशिष्य प्रमुख आकर्षणं लघुगीतानि, क्रीडाः, भाषाशिक्षणमाध्यमेन बालकेन्द्रादि आयोजनेन बहुत्र चालिताः। इत्थं संस्कृतसंवर्धनेन सह शिक्षकाणां, छात्राणां, पाठ्यक्रमस्य, उपकरणानां, प्राविधिकप्रक्रमाणाञ्च संवर्धनमपि अभवत्। राज्यशः पश्यामः चेत् भिन्नराज्येषु सम्प्रति संस्कृतं द्वितीयभाषात्वेन पाठ्यते तच्च उत्तराखण्ड-हिमाचलप्रदेशयोः इति। पुनश्च तत्तत् राज्यगत रेलस्थानकेष्वपि उर्दुभाषायाः स्थाने संस्कृते एव नामोल्लेखः भविष्यतीति उद्घुष्टम्। सर्वकारेण गते वर्षे 22 गुणितमधिकं धनं अन्यभाषाऽपेक्षया संस्कृतसंवर्धनार्थं व्ययीकृतमिति ज्ञायते। तत्र 643 कोटिपरिमितं धनं संस्कृतविश्वविद्यालयस्य कृते दत्तं तथैव अन्यभाषाणां मिलित्वा 29 कोटि धनं दत्तम्।

राष्ट्रियसंस्कृतसंस्थानं नवदेहली, लालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः त्रयाणां विश्वविद्यालयानां केन्द्रियविश्वविद्यालयत्वेन परिणमनमपि केन्द्रसर्वकारपक्षतः जातम्।

## उपसंहारः

“वृद्धस्य वचनं ग्राह्यं ह्यापत्काले उपस्थितौ” इति भगवद्गीतायाः सूक्तिमनुसृत्य सम्प्रति प्रवर्तनीयमिति अधिगतमस्माभिः। यतः संस्कृतं जननीत्वेन ज्ञानवृद्धरूपा राराजते सर्वोपरि इत्यस्मात् संस्कृतं, ततः निर्गतां संस्कृतिं च अनुसरामः चेत् पुनः जीवने वयम् आत्मसन्तुष्टिं पुनर्वैभवं च प्राप्नुयाम। परस्परं सम्पर्कं विनाऽपि शिक्षणं, प्रशिक्षणं, अन्यविधक्रियाकलापाश्च भवितुमर्हन्ति चेत् तत्र कारणं प्राविधिकसमुत्कर्ष एव। तत्रापि नूनं प्रयासाः विधेयाः अस्माभिः। निजजीवनं सार्थकं कर्तुं आपद्कालेऽस्मिन् सकृत् संस्कृतस्य विकासाय प्रयतमानाः अग्रेऽपि तथैव दृढसङ्कल्पेन संवर्धने योगदानं कुर्युः इति आशासे।

## सन्दर्भः

1. विश्वस्य वृत्तान्तः – https://vishvasyavrutantah.com/
2. सम्भाषण सन्देशः - https://sambhashanasandesha.in/
3. Times of India - https://timesofindia.indiatimes.com/defaultinterstitial.cms
4. सुधर्मा - https://sudharmasanskritdaily.in/
5. http://nsktu.ac.in/
6. http://www.sanskrit.nic.in/
7. https://ngodarpan.gov.in/